No. १००६-घ

Title रुद्रयामले तंत्रे वज्रपंजराख्यं -सूर्यकवचम्

Author

Extent २ Age

Subject तन्त्रम् . सम्पूर्णम्

नं० १००६ – घ

रुद्रयामलेतन्त्रे वज्रपंजराख्यं सूर्यकवचम् (तन्त्राम)

नं० १००५ – घ २ पत्रे

पत्रे २ (द्वे) (सम्पूर्णम्)

नं० २५०५छ
छैदग्रामेहे तोणे
सूर्यवज्रपंजर
ग्रन्थपत्र
२ पत्रे

श्रीगणेशायनमः ॐश्रीसूर्यायनमः ओं योदेवदेवैर्भगवान्भास्करोमहसां
निधिः गायत्रीनायको भास्वान्सवितेति प्रगीयते तस्याहंकवचंदिव्यंवज्रपं
जरकाभिधं सर्वमंत्रमयंगुह्यंमूलविद्यारहस्यकं सर्वपापहरंदेवी दुःखदा
रिद्र्यनाशनं महाकुष्टहरंदेवी सर्वरोगनिवर्हणं सर्वशत्रुसमूहघ्नंसंग्रामे।
विजयप्रदं सर्वतेजोमयंसर्वदेवदानवपूजितं रणेराजभयेघोरेसर्वोपद्रव
नाशनं मातृकावेष्टितंवर्मभैरवाननिर्गतं ग्रहपीडाहरंदेवी सर्वसंकटना
शनं धारणादस्यदेवेशि ब्रह्मालोकपितामहः विष्णुर्नारायणोदेवि रणेदैत्यान्
जयिष्यति शंकरः सर्वलोकेशो वासवोपिदिवस्पतिः उपदेशो शशीदेविशि ओषधीशः
शिवोहंभैरवेश्वरः मंत्रात्मकंपरंवर्मसवितुःसारमुत्तमं योधारयेद्भुजेमूर्ध्निर
विवारेमहेश्वरि सराजवल्लभोलोकेतेजस्वीवैरिमर्दनः बहुनोक्तेनकिंदेवि
कवचस्यास्यधारणात् इहलोकेधनारोग्यवृद्धिर्भवतिनान्यथा कवचस्या
स्यसुभगे मूलविद्यामयस्यच वज्रपंजरकाख्यस्यमुनिर्ब्रह्मासमीरितः गा
यत्र्यंछंदइत्युक्तंदेवतासवितास्मृतः मायाबीजंशरत्कान्तिर्नमः कीलकमी
श्वरि सर्वार्थसाधनेदेवी विनियोगः प्रकीर्तितः ओंअस्यश्रीवज्रपंजर
काख्यस्यसूर्यकवचस्य श्रीब्रह्माऋषिः गायत्र्यंछंदः श्रीसवितादेवता

परत्रपरमामुक्तिर्देवानामपिदुर्लभा॥५

सू० ह्रीं बीजं सः शक्तिः नमः कीलकं सर्वार्थसाधने सूर्यकवचपाठे विनियोगः।
१ अथ ध्यानं गायत्री तत्पुरुषाय विद्महे भास्कराय धीमहि तन्नः सूर्यः प्रचोदया
त् ३ अथ ध्यानम् ॐ मणिमुकुटमरीचिस्फीतभास्वल्ललाटं कनककलश
हस्ताम्भोजहस्तारविंदं निखिलनिगमगम्यं विस्फुरालिंगितांगं मनसि सरसि
जे ष्टं सूर्यमीडे नमामि ओं अं आं इं ईं शिरः पातु ओं सूर्यो मंत्रविग्रहः उं ऊं ऋं ॠं
ललाटं मे ह्रां रविः पातु चिन्मयः ऌं ॡं एं ऐं पातु नेत्रे ह्रीं ममारुणसारथिः ओं औं
अं अः श्रुती पातु सः सर्वजगदीश्वरः कं खं गं घं पातु गंडौ मे सूर्यः सुरपूजितः
पं चं छं जं झं पातु च नासां मे पातुर्यमाप्रभुः टं ठं डं ढं मुखं पायाद्योगीश्वरपूजि
तः तं थं दं धं गलं मे पातु नं नारायणवल्लभः पं फं बं भं मम स्कंधौ पातु मं महसां
निधिः यं रं लं वं भुजौ पातु मूलं सकलनायकः शं षं सं हं पातु वक्षो मूलमंत्र
मयो ध्रुवः लं क्षः कुक्षिं सदा पातु ग्रहनाथो दिनेश्वरः ङं ञं णं नं मं मे पातु पृष्ठं
दिवसनायकः अं आं इं ईं उं ऊं ऋं ॠं नाभिं पातु तमोपहः ऌं ॡं एं ऐं ओं औं अं
अः लिंगं मे व्याद्ग्रहेश्वरः कं खं गं घं चं छं जं झं कटिं भानुर्ममावतु टं ठं डं ढं तं थं
न दं धं जानू भास्वान्मम मावतु पं फं बं भं यं रं लं वं जंघे मे व्याद्विभाकरः शं षं सं हं लं १
क्षः पातु मूलं पादौ त्रयीतनुः ङं ञं णं नं मं मे पातु सविता सकलं वपुः सोमः पू

वैं च मे पातु भौमोऽग्नौ मां सदावतु बुधो मां दक्षिणे पातु नैऋत्यां गुरुरेव मां पश्चि
मे मां सितः पातु वायव्यां मां शनैश्चरः उत्तरे मां तमः पायादैशान्यां मां शिखीत
था ऊर्ध्वे मां पातु मिहिरो मामधस्ताज्जगत्पतिः प्रभाते भास्करः पातु मध्याह्ने मां दि
नेश्वरः सायं वेदप्रियः पातु निशीथे विस्फुरापतिः सर्वत्र सर्वदा सूर्यः पातु मां च
क्रनायकः रणे राजकुले द्यूते विवादे शत्रुसंकटे संग्रामे च ज्वरे घोरे पातु मां स
विता प्रभुः ॐ ॐ ॐ उत्कुं उत्कुह समयः सूर्योऽवतां मां भयात् ह्रां ह्रीं ह्रुं हहहाहसौः ह
हंमो सहसौवतात्सर्वतः सः सः सः सससो न पाहून चरा क्लौं राद्रणो संकरात् पायात्
मां कुलनायकोपि सविता ॐ ह्रीं हसौ सर्वदा द्रां द्रीं द्रूं दद त्तं तथा चतरणि भौमै
भयाद्भास्करो रां रीं रूं रुरु रूं रविज्वरभयात्कुष्टाच्च भल्लामयात् अं अं आं विवि
वीमहाभयभयान्मां पातु मार्त्तंडको मूलं व्याप्ततनुः सदावतु परं हंसः सहस्रांशु
मान् इतीदं कवचं दिव्यं वज्रपंजरकाभिधं सर्वदेवरहस्यं च मातृकामंत्रवेष्टि
तं महारोगभयघ्नं च पापघ्नं मनुखोदितं गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं
शिवे लिखित्वा रविवारे तु तिष्ये वा जन्मभे प्रिये अष्टगंधेन दिव्येन सुधाक्षी
रेण पार्वती अर्कक्षीरेण पुण्येन भूर्जत्वचि महेश्वरि कनकीकाष्ठलेखिन्या क
वचं भास्करोदये श्वेतसूत्रेण रक्तेन श्यामेनावेष्टयेद्गुटी सौवर्णेनाथ संवेष्ट्य

स० धारयेत्मूर्ध्निवाभुजे रणेरिपुंजयेद्देविविवादेन्सदसिजेष्यति राजमान्योभवे
२ न्नित्यंसर्वतेजोमयोभवेत् कंठस्थापुत्रदादेविकुक्षिस्थारोगनाशिनी शिरस्था
१ गुटिकादिव्याराजलोकवशंकरी भुजस्थाधनदानित्यंतेजोवुद्धिविवर्धिनी वं
ध्यावाकाकवंध्यावामृतवत्सावयांगना कंठेसंधारयेन्नित्यंबहुपुत्रंप्रजायते
यस्यदेहेभवेन्नित्यंगुटिकैषामहेश्वरी महास्त्राणींद्रमुक्तानिब्रह्मास्त्रादीनिपा
र्वति तद्देहंप्राप्यव्यर्थानिभविष्यंतिनसंशयः त्रिकालंयःपठेन्नित्यंकवचंव
ज्रपंजरं तस्यसद्योमहादेविपूजयेघस्त्रयीतनुं तस्यपूजार्जितंपुण्यंजन्मकोटी
षुनिष्फलं शतावर्तंपठेद्धर्मेसप्तम्यांरविवासरे महाकुष्टार्दितोदेविमुच्यतेना
त्रसंशयः निरोगोयःपठेद्धर्मेदरिद्रोवज्रपंजरं लक्ष्मीवान्जायतेदेविसद्यःसू
र्येप्रसादतः भक्त्यायःप्रपठेद्देवि कवचंप्रत्यहंप्रिये इहलोकेश्रियंभुक्त्वादेहांते
मुक्तिमाप्नुयात् इतिश्रीरुद्रयामलेतंत्रेवज्रपंजराख्यंसूर्येकवचंसंपूर्णम्
॥५३ शुभंभवतु ॥

सविताबरदोभवेत् अज्ञात्वाकवचंदेवि५५

वृ.ता